अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद-
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्रार्थ्यते ।।३९।।

ADVAITAṀ SUKHA-DUḤKHAYOR ANUGATAṀ SARVĀSV AVASTHĀSU YAD-
VIŚRĀMO HṚDAYASYA YATRA JARASĀ YASMINN HĀRYO RASAḤ.
KĀLENĀVARAṆĀTYAYĀT PARIṆATE YAT PREMA-SĀRE STHITAṀ
BHADRAṀ TASYA SUMĀNUṢASYA KATHAM APY EKAṀ HI TAT PRĀRTHYATE..

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥१७।।

AHETUḤ PAKṢA-PĀTO YAS TASYA NĀSTI PRATIKRIYĀ.
SA HI SNEHĀTMAKAS TANTUR ANTAR-BHŪTĀNI SĪVYATI..

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ।।३५।।

VINIŚCETUṀ ŚAKYO NA SUKHAM ITI VĀ DUḤKHAM ITI VĀ
PRAMOHO NIDRĀ VĀ KIMU VIṢA-VISARPAḤ KIMU MADAḤ.
TAVA SPARŚE SPARŚE MAMA HI PARIMŪḌHENDRIYA-GAṆO
VIKĀRAŚ CAITANYAṀ BHRAMAYATI CA SAṀMĪLAYATI CA..